CC-0. In Public Domain. Digitization by eGangotri

के. १५८३
R.

प्रताप मल्लको कृष्णमन्दिर अभिलेख

नेपाल संवत् ७६९ (वि. सं. १७०५) मा लेखिएको यस अभिलेखमा मध्य मल्लकालका कान्तिपुरका एक राजा प्रताप मल्लको र उनको पुर्खाको वर्णन गरिएको छ । यसबाट मल्ल राजाहरूको इतिहास जान्नमा केही सहायता प्राप्त हुन्छ ।

ऐतिहासिक महत्व—यो अभिलेख मल्ल राजाहरूको आंशिक इतिहास-निर्माणमा निकै सहयोग गर्दछ । विशेषतः यस अभिलेखबाट प्रताप मल्लको विजय र उनका समकालिक भादगाउँका राजा र पाटनका राजाहरूसँग उनको सम्बन्धबारे घेरै कुरा ज्ञात हुन्छ । यस अभिलेखद्वारा नै गोर्खाका राजा हम्बर शाहले कान्तिपुरमा आक्रमण गरेको कुरा ज्ञात हुन्छ (श्लोक—५)

यस अभिलेखमा प्रतापमल्लले भोट देशसँग युद्ध गरी जुती र खासा जितेर कान्तिपुर राज्यमा गाभेको कुराको वर्णन गरिएकोले सम्बद्ध इतिहासमा पनि यसले केही कुरा बताएको छ ।

प्रताप मल्लले आफ्नो एक विवाह भारतको (कूच ?) बिहारका राजाकी छोरीसँग गरेको कुराको वर्णन यस अभिलेखले गरेको छ । यस वर्णनबाट मध्यमल्लकालमा पनि नेपालले भारतसँग सांस्कृतिक सम्बन्ध कायमै राखेको कुरा बुझिन्छ । यस अभिलेखमा प्रताप मल्लका ससुराको वंशको पनि वर्णन गरिएको छ । यो बाहेक बिहारका ती राजाहरूको नाम जान्ने साधन अहं भएजस्तो लाग्दैन ।

साहित्यिक विशेषता—यो अभिलेख पूर्वार्धसम्म श्लोकबद्ध संस्कृतमा छ र बाँकी आधाधाहि नेवारी भाषामा । संस्कृत भागमा ललित श्लोक निबन्धित गरिएका छन् । अज्ञात लेखकको भाषामा पूर्ण अधिकार भएको कुरा अभिलेख स्पष्टतः बताउंछ । प्रताप मल्लकी रानी रूपमतीको वर्णनमा कविले जति राम्रो शब्द चित्र प्रस्तुत गरेका छन् त्यो आलोचनीय छ ।

प्रताप मल्ल "कवीन्द्र" को रूपमा प्रख्यात भएका थिए । उनले आफ्ना टकमा र अभिलेखहरूमा त्यही उपाधि राखेका छन् । यस कुराको पुष्टिमा उनैले बनाएका कतिपय अभिलेख छन् जसमा उनैले रचेका ललित संस्कृत श्लोकहरू उत्कीर्ण गरिएका छन् ।

मूल्य: ९२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीर्वाणयुद्ध शाहको वाग्मती अभिलेख

यो अभिलेख साहित्य र इतिहासको दृष्टिले निकै महत्वपूर्ण छ। यस अभिलेखलाई हामी शाहकालको सर्वभन्दा श्रेष्ठ अभिलेख मान्न सक्दछौं।

ऐतिहासिक महत्व—यो अखिलेख गीर्वाणयुद्ध शाह, महारानी ललितत्रिपुरसुन्दरी (गीर्वाणकी जेठी आमा) र रणबहादुर शाहको त्रिशक्ति शासनको पालाको हो, यसैले यसमा उक्त तीनै व्यक्तिको उल्लेख गरिएको छ। यसबाहेक वाग्मतीको स्तुतिपछि शाहवंशावली पनि यसमा लेखिएको छ। पृथ्वीनारायण शाहको विजयवर्णन पनि यसमा प्रासङ्गिक रूपमा वर्णन गरिएको छ। रणबहादुर शाहको कान्तिमतीसंगको प्रेमप्रसंगको पनि यसमा वर्णन गरिएको छ। यस अभिलेखमा तत्कालीन प्रधानमन्त्री भीमसेन थापाको पनि राम्रो वर्णन गरिएको छ। प्रासंगिक रूपमा भीमसेन थापाका कृतिहरू र चरित्रको पनि उज्ज्वल वर्णन गरिएको छ। यस अभिलेखमा तत्कालीन युद्ध र त्यसमा खटिएका प्रमुख वीर सैनिक नयनसिंह थापाको पनि वर्णन गरिएको छ। भीमसेन थापा-जसको उदात्त वर्णन पण्डित वाणीविलास पाण्डेले जसरी गरेका छन् त्यो हेर्दा उनको (भीमसेन थापाको) पतनबारे पनि हामीलाई केही शङ्का लाग्दछ। यस्तो उदात्त वर्णन गरिने व्यक्तिको त्यति चाँडै त्यति रहस्यपूर्ण ढंगबाट पतन हुनु एक आश्चर्यपूर्ण घटना लाग्दछ। तथाकथित सानो कुलमा जन्मेका भीमसेनले चाँडै नै प्रधानमन्त्री पद पाएर देशभक्ति प्रदर्शित गरी राष्ट्रियता देखाउन

खोज्नु नै उनको पतनको कारण हुन आएको कुरा इतिहासकारहरूले अतिसुकै कराए पनि बिसिन सकिंदैन। यस्तो उदात्त वर्णन गरिएको २६ वर्षपछि स्वयं भीमसेन थापाले दाउपेचमा परेर आत्मघात गरी मर्नुपऱ्यो। यही अभिलेखले भीमसेनको लाशलाई श्याल कुकुरले खाएको देख्यो—यस कुराको औचित्यको समर्थन ठूला इतिहासकारले स्वीकार गरेका छन्। उनका अरू इतिहरूलाई खोपामा राखेर कुरा गर्दा एउटा कुरा त राम्रो देखिन्छ—त्यो हो गीर्वाणयुद्धको जीवनरक्षा। वि० सं० १९१२ मा लेखिएको वाक्यप्रबन्ध नाम भएको हस्तलिखित ग्रन्थमा लेखिएको छ :—

"एहि सम्वतमा (१८६२ वि० सं०) दर्बारमा कल्हुदा आफ्ना विमातृ भाई शेरबहादुर शाहीले दगा गऱ्यो ताहापछि दर्बारमा हंगामा भयो झंवै महाराजाका सन्तान नष्ट पऱ्या मध्यम अवस्था १ बालक गीर्वाणयुद्धविक्रम शाह थीया। बडा मुस्किलले जनाना महलमा लुकाई मानदिषि बचायाको भीमसेन थापाले हो।"

उक्त कुरा मान्ने होभने (मान्नुपर्दैन र?) गीर्वाणयुद्धविक्रम शाहलाई बचाई राजवंशप्रति भक्ति देखाउनु भीमसेन थापाको भूल रहेछ? भने उनलाई आज जुन-जुन लाञ्छन लगाइँदैछ त्यो के सत्य हो?

साहित्यिक विशेषता—सुललित संस्कृतमा निबन्धित ५४ श्लोकको यस अभिलेखलाई लघुकाव्य भन्दा अत्युक्ति नहोला। यस अभिलेखका रचयिता पण्डित वाणीविलास पाण्डे हुन्। यी संस्कृत भाषाका एक

20832

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ने. १५४३

उच्चकोटिका कवि थिए भन्ने कुरा यस अभिलेखबाट स्पष्टतः ज्ञात हुन्छ । यो अभिलेखबाहेक यिनका अरू रचना निम्न हुन् :—

१—धौकलसिंहको १८५० वि० सं० को नारायण स्थान अभिलेख ।

२—महारानी सुवर्णप्रभाको वि० सं० १८६५को नक्साल अभिलेख ।

३—रानी लक्ष्मीदेवीको वि० सं० १८६९ को पक्षली अभिलेख ।

४—दुर्गाकृत्यकौमुदी ।

५—वाणीविलाससिद्धान्त ।

६—पुरश्चरणप्रयोगरत्नदीपिका ।

७—वेदान्तसारसंग्रह ।

८—गङ्गास्तोत्र ।

९—नवरत्नयुगलस्तोत्र ।

१०—प्रशस्तिरत्नावली[1] ।

वाणीविलासले बनाएका ग्रन्थ र अभिलेखसूची देख्दा उनलाई एक ठूला लेखक मान्न गाह्रारो पर्दैन । यिनको साहित्यिक प्रभाव त्यस कालका साहित्यिकहरूमा परेको पनि देखिन्छ । प्रस्तुत अभिलेखको प्रारम्भमा गरिएको वाग्मतीस्तुतिको छन्द र लयको प्रभाव तत्कालीन नेपाली कवि इन्दिरसमा पनि परेको बुझिन्छ । इन्दिरसले लेखेये :—

ब्रज त बेस् बन्यो तिम्रि जन्मले ।
लक्ष्मी छन् जहाँ तिम्रि प्रीतिले ॥

१पूर्णिमा १–१, पृ० ४१–४२

प्रिय ! निहार हे प्राण घर्दछन् ।
तिमरि हुन् सबै खोजि गर्दछन् ॥
(गोपिकास्तुति)

यस रूपमा वाणीविलासको साहित्यिक महत्व अझ बढ्दछ ।

संस्कृतका धुरन्धर पण्डित वाणीविलासले आधा भाग अभिलेख संस्कृतमा लेखी आधा भाग नेपाली भाषामा लेखेर नेपाली भाषाको सम्मान गरेका छन् । वाणीविलासको संस्कृत भाषामा जत्ति प्रवाह देखिन्छ त्यति नेपालीमा नदेखिए तापनि तत्कालीन परिस्थिति हेर्दा उनको नेपाली भाषा निकै परिष्कृत देखिन्छ । तर नेपाली भाषालाई त्यस अभिलेखमा वाणी-विलास पण्डितजीले "भाषा" लेखिदिएका छन् ।

सामान्यतः हेर्दा यस अभिलेखले नेपालको इतिहास, संस्कृत र नेपाली भाषाको इतिहासको एक क्रममा राम्रो सहयोग गरेको देखिन्छ ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुमारगुप्तको मन्दसोर अभिलेख

मालव संवत् ४९३ र ५२९ मा लेखिएको यो भारतको मन्दसोरबाट प्राप्त भएको हो। सुललित ४४ श्लोकमा निबन्धित यस अभिलेखलाई लघुकाव्य भने अत्युक्ति नहोला।

ऐतिहासिक महत्व—छत्तीस वर्षको अवधिमा लेखिएको यस अभिलेखमा तत्कालीन शासकको नाम 'कुमारगुप्त' दिइएको छ। तर तीं कुमारगुप्तलाई तन्नामक प्रथम अथवा द्वितीय मान्ने यस कुरामा अनिश्चितता छ।

गुप्तकालमा मालव (विक्रम) संवत्को प्रयोग गर्नु यस अभिलेखको विशेषता हो तत्र गुप्त राजाहरूको पालामा लेखिएका अभिलेखमा गुप्त संवत्कै प्रयोग देखिन्छ। यस अभिलेखमा तत्कालीन सामन्त बन्धुवर्मा, उनका बाबु र उनको चरित्रको पनि वर्णन गरिएको छ।

यस अभिलेखलाई कुंदाउन लगाउने जुलाहाहरूको श्रेणी (संघटन) हो जो लाटदेश (गुजरात) बाट दशपुरमा आएर बस्न थालेको थियो। त्यस श्रेणीले सूर्यको मन्दिर बनाई आफ्नो धार्मिक भावको परिचय दिइएको छ। व्यापारीहरू प्रायः सूर्यका पूजक हुन्थे भन्ने कुरा यस अभिलेखले बताएको छ।[1]

---

१. मानदेव प्रथम (३८६–४२७ शक संवत्) को पालामा पनि गुहमित्र नाम गरेका व्यापारीका बेताले सूर्यको मूर्ति स्थापित गरी अभिलेख पनि लेखाउन लगाएका थिए। (नोलो शिलालेख संख्या—७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस अभिलेखले तत्कालीन आर्थिक इतिहास पनि संरक्षित राखेको छ । गुजरात त्यस कालमा वैदेशिक व्यापारको केन्द्र थियो । यहींबाट भारतको यूरोपसंग व्यापार चल्दथ्यो । यस कुराको केही झल्को यस अभिलेखबाट ज्ञात हुन्छ । यस अभिलेखबाट जुलाहाहरूको एउटा श्रेणी (संघटन) थियो भन्ने कुरा पनि थाहा पाइन्छ । यस्तै राम्रो संगठनले गर्दा भारतको वैदेशिक व्यापार त्यस कालमा त्यति विकसित भएको थियो । यस्तै अरू काममा लाग्ने मानिसहरूले पनि यस्तै संगठन खड़ा गरेका थिए होलान् भन्ने अनुमान गर्न सकिन्छ ।

साहित्यिक विशेषता—सुललित संस्कृत, अभ्यस्त कवि वत्सभट्टि, छन्दरचना विभिन्न, चित्रण विभिन्न आदि विशेषता यस अभिलेखमा देखिन्छ । प्रारम्भमा भाव, मध्यमा वीररस (बन्धुवर्माको वर्णन), कुमार गुप्तको शासनकालको विचित्र शान्तिको वर्णन (श्लोक—२३), शृंगार रसको वर्णन रहेकोले यस अभिलेखको साहित्यिक विशेषता निकै बढ़ेको छ । गुप्तकालको सुवर्णकालले तत्कालीन साहित्यमा के कति प्रभाव पारेको थियो यो कुरा यस अभिलेखको शैलीले बताएको छ । व्यापारिकहरू पनि साहित्यको कति प्रेम गर्थे भन्ने कुरा यस अभिलेखले स्पष्टतः बताएको छ ।

यस अभिलेखको अध्ययन गर्दा : कता कता कालिदासको स्वर गुनगुनाए जस्तो सुनिन्छ । कालिदासलाई कुमारगुप्त (प्रथम) को समकालिक मानें उनको कवित्वले कति चाँड़ै स्वागत पायो यो विचारणीय छ । कालिदासलाई त्यसभन्दा झण्डै पाँच शय वर्ष (५७ ई० पू०) पहिले भएका मान्ने भए त उनको कवित्वको प्रचार र प्रसार भएको

त घेरै समय बितिसकेकोले वत्सभट्टिमाथि कालिदासको प्रभाव परेकोमा कुनै आश्चर्य प्रकट गर्नुपरोइन । विक्रम संवत्को प्रारम्भमा कालिदास जति लोकप्रिय थिए उत्तिकै वत्सभट्टिको पालामा र आज पनि उत्तिकै छन् । विश्वकवि यसैलाई भन्छन् ।

जे होस्, यस अभिलेखले संस्कृत साहित्यको इतिहासमा एउटा रत्न थपेको छ र यो बाहेक अरू कति नभेटिएका कवि वत्सभट्टि पनि यत्तिबाटै अमर भएर गए ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यशोधर्मदेवको मन्दसोर स्तम्भाभिलेख

मालव संवत् ५८९ मा उत्कीर्ण यस अभिलेखले गुप्त साम्राज्यको पतन र त्यसको परिणामस्वरूप उठेको आन्तरिक अनेकताको इतिहास संरचित गरेको छ। यशोधर्मन्‌को पूर्व इतिहास अज्ञात छ तर सम्भवतः उनी गुप्तसम्राट्‌का अधीन मालवाका प्रान्तीय शासक थिए। छैठौं शताब्दीतिर गुप्तवंशी राजाहरू निर्बल भएको वेलामा हूण शासकहरूको आक्रमण भएकोले यशोधर्मन्‌ले स्वतन्त्र भएर आफ्नै अलग्ग साम्राज्य स्थापना गर्ने संकल्प गर्न थालेका थिए। यिनी औलिकर वंशका थिए। यस अभिलेखमा उनका अनेक देशको विजय गरेको वर्णन गरिएको छ। यहाँ यशोधर्माले विन्ध्य, पारियात्र आदि देश जितेको कुराको वर्णन गरिएको छ। मन्दसोरबाटै प्राप्त यिनको अर्को अभिलेखमा यिनको दिग्विजयको वर्णन गरिएको छ। यिनले गुप्त साम्राज्यको पतनको एक कारण हूण जातिका राजा मिहिरकुललाई पराजित गरेका थिए। उनको अभिलेखमा उनलाई उत्तर भारतको एक मात्र सम्राट् सिद्ध गर्न कोशिश गरिएको कुरा ऐतिहासिक रूपवाट मात्र सकिदैन।

"यशोधमन् धूमकेतु (Comet) जस्तो आए अनि यस्तै रूपवाट गए" भन्ने कुरा पूर्णतया सत्य देखिन्छ किनभने उनी ५८७ वि० सं०—देखि ५९७ वि० सं० सम्म मात्र रहे त्यसपछि उनको अन्तिम जीवन के भयो थाहा पाउन सकिएको छैन। यिनको पतनको परिणामस्वरूप उत्तर भारतमा मौखरि र उत्तर गुप्तवंश (Later Guptas) हरूले आ-आफ्नो साम्राज्य खड़ा गर्न थाले।

साहित्यिक महत्व—यशोधर्मन् पुच्छेतारा जस्तै आए गए तर तिनले केही धुर्वा छोड़ेर गए। आज उनको सम्झना गराउने दुई अभिलेख मन्दसोरमा विद्यमान छन्। यी अभिलेखको ऐतिहासिक महत्व त छँदै छ साहित्यिक महत्व पनि यसको कम छैन। यस अभिलेखले कालिदास र गुप्तोत्तर भारतमा संस्कृत साहित्यको इतिहासमा एक शृंखला थपिदिएको छ।

कुवा बनाएको उत्सवमा उत्कीर्ण गराइएको यस साहित्यिक अभिलेखले यशोधर्माको साहित्यप्रेम प्रकट गरेको छ। यसमा अज्ञात कविले आफ्नो कवित्व सकेसम्म देखाउन खोजेका छन्। यस अभिलेखले पनि कालिदासको शैलीमा गीत गाएको बुझिन्छ किनभने यस अभिलेखमा :—

स्वसुखमनभिवाञ्छन्दुर्गमेदुव्वन्यसङ्गाम्
धुरमतिगुरुभारां यो दधद्भूर्तुरर्थे।
वहति नृपतिवेषं केवलं लक्ष्यमात्रम्
वलिनमिवविलम्बं कम्बलं बाहुलेयः।

भनिएको कुरा महाकवि कालिदासले धेरै पहिले अभिज्ञानशाकुन्तलमा भनिसकेका थिए :—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेवं विधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णम्
शमयति परितापं छायया संश्रितानाम् ॥[१]

वृत्ति

शब्दचयन भिन्न भए पनि दुवै कविको मनोदशा भिन्नता देखिदैन यस रूपमा यस अभिलेखले कालिदासको महत्व झन बढाएको छ।

---

१. अभिज्ञान शाकुन्तल अंक ५, श्लोक ६

अभिलेख

लिपि—पूर्वलिच्छवि (तथाकथित गुप्त लिपि)

स्थान—चाँगुनारायण

संवत् ३८६ ज्यैष्ठमासे शुक्लपक्षे प्रतिपदि १ रोहिणीनक्षत्रयुक्तेचन्द्रमसि मुहूर्त्ते प्रशस्तेभिजिति

श्रीवत्साङ्कितदीप्तचारुविपुलप्रोद्वृत्तवक्षस्थलः
श्रीवक्षस्तनपद्मबाहुरुचिरः सम्यक्प्रवृद्धोत्सवः
त्रैलोक्यभ्रमयन्त्रवर्त्तिविविधव्यासङ्गनित्योद्ययः
दोलाद्यौ निवसञ्जयत्यनिमिषैरभ्यर्च्यमानो हरिः
श्रीमच्चारुनयप्रतापविभवैर्व्यायामसंक्षेपकृत्
राजाभूद्वृषदेव इत्यनुपमः सत्यप्रतिज्ञोदयः
यो रेजे सवितेव दीप्तकिरणैः सम्यग्घृतैः स्वैः सुतैः
विद्वद्भिर्व्वहुगर्ग्वितैरवबलैः शूरैर्व्विनीतात्मभिः
तस्याभूत्तनयः समृद्धविषयः सङ्ख्येष्वजेयोरिभिः
राजा शङ्करदेव इत्यनुपमो दीप्तिप्रदः सत्यधीः
सोयं विक्रमदानमानविभवैर्ल्लब्ध्वा यशः पुष्कलम्
स्वं संयम्य ररक्ष गामभिमतैर्भृत्यैर्मृगेन्द्रोपमः
तस्याप्युत्तम धर्म्मकर्म्मयशसःपुत्रोर्थविद्धार्मिकः
धर्म्मज्ञो विनयेप्युरुत्तमगुणः श्रीधर्म्मदेवो नृपः
धर्म्मेणैव कुलक्रमागतमपान्नेपालराज्यं महत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतापमल्लको कृष्णमन्दिरको शिलालेख

आसीच्छ्रीसूर्यवंशे रघुनृपकुलजो रामचन्द्रो नृपेश-
स्तद्वंशे नान्यदेवोवनिपतिरभवत्तत्सुतो गांगदेवः।
तत्पुत्रोऽभून्नृसिंहो नरपतिरतुलस्तत्सुतो रामसिंहः
तज्जः श्रीशक्तिसिंहो धरणिपतिरतो भूप भूपालसिंहः ॥ (१)

तस्मात्कार्णाटचूडामणिरिव हरयुत्सिंहदेवोस्य वंशे
भूपः श्रीयक्षमल्लो नरपतिरतुलो रत्नमल्लोप्यमुष्मात्।
तस्मात् श्रीसूर्य्यमल्लोऽवनिपतिरभवत्तत्तनूजोमराख्यो
मल्लो भूत्तस्य पुत्रो रिपुगणविजयी श्रीमहेन्द्राख्य मल्लः ॥ (२)

तस्मात् श्रीशिवसिंहोभूद्धरिहरसिंहसुतस्तस्मात्।
तस्माल्लक्ष्मीनृसिंहोपि नरसिंहपराक्रमः ॥ (३)

तस्मात् श्रीमत्प्रतापो नरपतिरभवद्भूपमालावलीषु
न्यस्यत्पादारविन्दद्वयरसविलसद्रेणुभिर्भूषणानि।
योऽकार्षीत्कूतिखाखाकिरमिति सहसा भोटभूपस्य देशा-
ज्जग्राहैवावदोनं प्रतिदिनमपरे यं भजन्ते नरेशाः ॥ (४)

भक्तग्रामनरेशमल्लनृपतिर्द्दृत्वेभमेनं भिया
भेजेसौ वसुधां जहार सुदृढं संदार्य्य दुर्गं पुनः।
श्रीमडुंवरसाहभूपतिवलं विध्वस्य दन्तावलम्
श्रीमत् सिद्धिनृसिंहमल्लनृपतेर्ज्जग्राह दुर्गावली (म्) ॥ (५)

आस्ते काप्यमरावतीव विलसद्दन्तोन्द्रदिव्याङ्गना-
युक्ता स्वर्णमयी विहारनगरी सा राजधानी परा।
श्रीमत् श्रीकमताधिकामरुपतेरिन्द्रेण तुल्यस्य च
प्रत्यर्थिव्रजनिर्ज्जितस्य नरयुन्नारायणस्यापि च ॥ (६)

लक्ष्मीनारायणस्तस्मात् धीरनारायणस्ततः। वी
पुत्री रूपमती तस्य प्राणनारायणः सुतः ॥ (७)

सेयं रूपमती सती गुणवती स्वर्णद्युतिः सन्मतिः
माद्यत्कुंजरगामिनी प्रणयिणी (नो) साक्षात् परा रुक्मिणी।
आसीत्सर्व्वगुणस्थितेर्न्नरपतेः श्रीमत्प्रतापस्य सा
पत्नी प्राणसमा यथा जलनिधेः पुत्री जगत्पायिनः ॥ (८)

कार्णाटी रंगघाटी कुचकनकघटी कामलीलैकवादी
स्वर्णालंकारकोटी हरिसदृशकटी चारुदेहानुपाटी।
नाम्ना राजमती महारसवती भूपप्रतापस्य सा
भूता भोगवधूटिका किल हरेर्भामेव जीवाधिका ॥ (९)

स्वर्गार्थं कृतवान् प्रतापनृपतिः सद्योषितोरेतयो
प्रासादं वसुपत्रपद्मसदृशं शृंगाष्टकैः शोभितम्।
नानाचित्रविराजितं सममयं तद्वैजयन्तेन वै
होमाद्यैरकरोच्छ्रुत्तिस्मृतिमतैरस्य प्रतिष्ठाविधि ॥ (१०)

एतयोर्म्मास्तु विश्लेषो रुक्मिणीभामयोरिति।
जन्मान्तरेप्ययं भूपो हरिर्मूर्तिरिहावसत् ॥ (११)

अतः परं देशभाषा ॥ हव सूर्य्यवंशस श्रीरामचन्द्रअवतार जुर, थ्वया वंशस नान्यदेव, थ्वया काय नरसिंहदेव, थ्वया काय रामसिंह, थ्वया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काय नरसिंहदेव, थ्वया काय रामसिंह, थ्वया काय शक्तिसिंह, थ्वया काय भूपालसिंह थ्वनलि हरसिंहदेव नेपाल विज्याकथ्मः थ्वया वंशस यक्षमल्ल, थ्वया काय रत्नमल्ल, थ्वया काय सूर्य्यमल्ल, थ्वया काय अमरमल्ल, थ्वया काय महेन्द्रमल्ल, थ्वया काय शिवसिंह, थ्वया काय हरिहरसिंह, थ्वया काय लक्ष्मीनरसिंहमल्ल, थ्वनलि श्री श्रीप्रतापमल्लदेव दत्त, विहारदेशया राजा नरनारायण, थ्वनलि लक्ष्मीनारायण, थ्वनलि वीरनारायण, थ्वया काय प्राणनारायण, म्ह्याच श्रीरूपमती देवी दत्त, थ्व रूपमति देवी श्रीश्रीप्रतापमल्लया पत्नि, कर्णाटदेशया श्रीराजमती प्रेयसी थ्वपनि नेघ्त्रसं परलोक जुयाव श्रीश्रीप्रतापमल्लन थ्व देवल दयक विज्याङाव रुक्मिणी सत्यभामाया स्वरूपन नेघ्मस सारिक दयकाव जन्मान्तरसं वायमुमालके कामनान थव नामनं वंश गोपालमूर्ति स्थापना याङ विज्याङ जुरो ।। सम्वत् ७६६ फाल्गुण कृष्णषष्ट्यान्तिथौ अनूराढ नक्षत्र हर्षन योग बृहस्पतिवासर ।। अतः परं पून भाषा ।। तूसाधन गुथि पूतच्छा गुथि घवनच्छा गुथि कृष्णाष्टमी गुथि दोलजात्रा गुथि कार्तिक थादिन पर्व्वकालस चाकलमत नित्यपूजा थादिन मालक्व गुथिया साहासन सिजघ्य तिसतया ।। थ्वसहासन रोहो; ह्लेवे चाहिकन पिचिल थिचिल यातसा स्यनकलसा पञ्चमहापातक ।।

———

गीर्वाणयुद्ध साहको वाग्वती अभिलेख

श्रीगणेशाय नमः ।। श्रीवाग्वत्यै नमः ।।

जननि वाग्वति त्वत्स्तुतीरवाङ्मनसगोचराः कर्तुमीश्वराः ।।
जगति पामरा मादृशा नराः कथमर्लतरामत्र ह्वयताम् ।। १ ।।

जलरुहं जलाज्जयते जलाज्जलरुहं न हि व्याप्तिमत्र तान् ।।
इति विघेर्हरस्यम्ब भीतिभिः शिवमुखाब्जजा त्वं सती भुवि ।। २ ।।

पशुपतेः स्फुटां त्वां दयामहं जननि वेद्मिः यत्त्वामुपागताः ।।
शिवपुरे जना भस्मधारणाः शशिविभूषणा नन्दिवाहनाः ।। ३ ।।

जलकणैर्युतो मारुतो वहन्नयति शुद्धतां दिग्विदिक्स्थितान् ।।
जननि जन्मिनः पातकात्मनः सुरपुरेन्ततः स्पर्शमात्रतः ।। ४ ।।

तव जलं समाश्रित्य यो जनः शिशिर आगते कम्पते ततः ।।
स्मरशरव्यथाकम्पनं जनाद्दधत उर्वशीमुख्यनायिकाः ।। ५ ।।

पतति यज्जले वस्तु तल्लघु किमपि यत्र वाःपुर एति तम् ।।
ननु यतो भवत्यम्ब तत्र किं त्वयि पतज्जनस्त्वेति तं शिवं ।। ६ ।।

जलगतं च यत्तच्च मज्जति गुरु किलेह यस्त्वज्जले जनः ।।
जननि पातकाद्योघसंचितो भवति मग्न उन्मज्जतीश्वरि ।। ७ ।।

घनविसर्जनं देवतार्चनं जननि तर्पणं पिण्डपातम् ।।
तव तटे जनो यत्करोत्ययं भवति तस्य तत्पुण्यमक्षयम् ।। ८ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव जलामृतं हस्तसंभृतं यदिह संततं पीयतेमृतम् ॥
जननि मन्यते तन्न चामृतं जलधिनिधिःसृतं देवतामृतम् ॥ ९ ॥
तव तटे जनन्यत्र वासतः पशुपतिर्जगन्मुक्तये स्थिराम् ॥
परिहसत्यहो विश्वनाथसत्कृतसुरापगां काशिकावहाम् ॥ १० ॥
तवतटोदर तीर्थकोटयस्तदुपवर्णने चेच्चतुर्मुखः ॥
दशशताननः स्यामहं तदा किमु भवेयमीदृक् तु न क्षमः ॥ ११ ॥
पशुपतिः शिवो ज्योतिरीश्वरः सकलसिद्धिदा गुह्यकालिका ॥
विजयते मुदा त्वत्तटे सदा त्वमिह सर्वदात्रेति नाद्भुतम् ॥ १२ ॥
सलिलसन्निधौ दैवयोगतो मृतिमुपागता ये चराचराः ॥
विरहिता श्रमो कोटिजन्मसंचितमलैस्तन्नन्तोशपत्तने ॥ १३ ॥
शिव जगत्पते पार्वतीपते पशुपते महादेव शंकर ॥
इति सुजल्पतोऽहर्निशं मम भवतु त्वत्तटे गाङ्गके स्थितिः ॥ १४ ॥
तव जलेथवा जन्हुजाजले शिव शिवेति वा राम राम वा ॥
मरणसन्निधौ जिह्विका मम वदतु ते स्तुतेरम्ब पाठतः ॥ १५ ॥
यदमलाम्बुनो नित्यसेवनं वृजिननाशनं दुःखदारुणम् ॥
भविकभावनं मुक्तिकारणं शरणमेमि तां वाग्वतीमहम् ॥ १६ ॥
सूरीन्द्ररामहृदयस्य सुतेन भक्त्या ।
वाणिविलासविदुषा रचितस्तवोऽयम् ॥
अस्योषसि प्रपठनाद्भवतु प्रसन्ना ।
श्रीवाग्वती वरनदी निखिलाघहन्त्री ॥ १७ ॥

इतिश्रीमन्महाराजाधिराजराज्ञ्याः श्रीललितत्रिपुरसुन्दरीदेव्या आज्ञया रामहृदयपण्डितात्मजवाणीविलासपण्डितकृतं वाग्वतीस्तोत्रम् शुभम् ।

विद्यापीठ-पुस्तकालय
20823

श्रीगणेशायनमः ॥ श्रीवाग्वत्यै नमः ॥ श्रीवैश्न (ष्ण) व्यै नमः ॥

यदमलाम्बुनो नित्यसेवनं वृजिननाशनं दुःखदारुणम् ।
भविकभावनं मुक्तिकारणं शरणमेमि तां वाग्वतीमहम् ॥ १ ॥

भक्तैतद्देशभूपाभ्युदयशतकरी कालिका जागरूका ।
योगी गोरक्षनाथोऽपि च जयति सदा यत्र बिघ्नं विनिघ्नन् ॥
शूराः सन्ति प्रजाः स्वप्रभुहितनिपुणा न्याययुक्ताः स्वतन्त्राः ।
क्षोऽयं गोर्खाभिधानो जगति विजयते कोऽपि रम्यः प्रदेशः ॥ २ ॥

तत्र द्रव्येशसाहो नृपवर उदितः पूर्णसाहोऽस्य पुत्र-
स्तस्य श्रीरामसाहो विरचितविविषश्लाघ्यलोकव्यवस्थः ।
तस्माच्छ्रीडम्बराख्योऽजनि तनयवरस्तत्सुतोऽभून्महात्मा
नाम्ना श्रीकृष्णसाहोऽभवदमलयशा रुद्रशाहोऽस्य सूनुः ॥ ३ ॥

भूपः पृथ्वीपतिस्तत्सुतवर उदभुत्तज्ज निर्वीरभद्र—
स्तस्मात्सत्सिद्धिशाली समजनि नरभूपालसाहोऽवनीशः ।
पृथ्वीनाराणोऽस्मादुदभवदवनावुद्यदुद्दामकीर्ति—
र्नेपालक्षोणिपालप्रवलरिपुकुले कल्पकालानलाभः ॥ ४ ॥

भूपो भक्तिभरेण योऽज्ञपवयसि प्राप्यैव वाराणसीम्
यात्रानन्तरमागतो स्वमहसा मार्गावरोधोद्यतान् ।
हत्वारीन्स्वपुरी प्रविश्य च नवकोटाख्यदुर्गं बला—
ज्जित्वा प्राप च काष्ठमण्डपपुरीं संहृत्य कोटिद्विषाम् ॥ ५ ॥

तस्मात्सिंहप्रतापोऽजनि नृपतिपतिः पुण्यवान्सत्प्रतापः
प्रादुर्भूतोऽप्यमुष्माज्जगति रणबहादूरराजाधिराजः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वालामालावशीलावलयरिपुकुलालोललीलाविलासो—
ल्लासासक्तावलालीकुचकलशविधिव्यर्थताकर्तृतेजाः ॥ ६ ॥
दाता पाताऽवुशास्ता निखिलगुणनिधिर्गानविद्यादिविद्या—
ऽभिज्ञो यः कम्पमाना विपुलभयवशात्पालयन्त्यादरेण ।
प्राक्प्रत्यक्सव्यसव्येतरत उपचरन्तोऽधिया यस्य विज्ञा—
राज्ञामाज्ञां मनोज्ञाः करकमलसत्कुड्मलोल्लासिशीर्षाः ॥ ७ ॥

सौन्दर्यातिशयादमुष्य नृपतेः प्राणाधिकप्रेयसी
श्रीमत्कान्तिमती त्रिलोकविदिता जायाऽभवद्वीक्ष्य याम् ।
एषा कापि सुरङ्गनासु किमियं किं नागकन्यासु वा
कामस्येति रतिः प्रिया किमथवा लोकोऽयमाशङ्कत ॥ ८ ॥

पुत्रं पर्वतचक्रवर्तिनृपतिं सिंहासनाध्यासितम्
स्वीयं वीक्ष्य विधाय दाननिकरानङ्के स्थिता स्वामिनः
एषा भागवतार्थमन्तसमये वाणीविलासाद्बुधा—
दाकर्ण्यैव हरिं निधाय हृदये लीना परब्रह्मणि ॥ ९ ॥
ललितत्रिपुरादिसुन्दरी चरमामुष्य नृपस्य सुन्दरी ।
जयति त्रिजगत्सु सुन्दरी भुवि कैलाश इवेशसुन्दरी ॥ १० ॥

स्वाङ्के स्वस्वामिना श्रीगुणवती निहिते भूमिपे पुत्रवर्ये
प्राणानाधाय नारायणचरणमनाः पुण्यकर्माणि नित्यम् ।
कुर्वाणाऽनाथदीनागतिकजनकृपापारवारां निधिः सा
साध्वीनामग्रगण्या जगति विजयते भूमिपालेन्द्रपत्नी ॥ ११ ॥

गीर्वाणोत्तरयुद्धविक्रमनृपः प्रोद्भूत उर्वीभृतः
पुत्रोऽस्माज्जलधेः सुधांशुरिव सद्धामाभिरामोदयः ।

लोकानन्दिकरः प्रचण्डमहसः सार्द्धाब्दको लब्धवान्
यो राज्यं जनकान्निजाज्जगति सज्जन्युन्नजानां मुदे ॥ १२ ॥
कर्णे दानं मनोजे द्युतिमतसुकृते धर्मराजेर्जुने स—
च्चौर्यं गाम्भीर्यधैर्ये श्रधिजलधि रवौ तेज आल्हादकत्वम्
चन्द्रे भोजे प्रसादं कविजनकविताऽस्वाद आधाय नूनम्
वाञ्छन्त्येकत्र धाता स्थितमिदमखिलं सृष्टवान्द्रष्टुमेतम् ॥ १३ ॥

ज्येष्ठा श्रीसिद्धिलक्ष्मीर्विलसति महिषी यस्य गोरक्षराज-
लक्ष्मीश्चैतत्तृतीयं पतितभजनपरा सर्वसाध्वीषु धन्या ।
प्रायो भूपोऽपि भूयोऽभुतकलिमहिमोद्भूतभूभारहेतु
ध्वस्त्यै कृश्नो (कृष्णो) वतीर्णोऽयमियमपि मुदे रुक्मिणीसत्यभामा ॥१४॥

यस्य श्रीभीमसेनः सचिवकुलमणिर्भाति भूपालमौलेः
कस्मिं श्चिद्घोरविघ्ने निपतति विधितो घोरगम्भीरधीर्यः
आवीद्भूपं धियोपदवशममकरोत्स्वीययायुष्यहेतोः
राज्ञः कीर्त्यै च नानाविध विमलयशो हेतु कर्माणि मन्त्री ॥ १५ ॥

जरन्नव्यं रम्यं प्रमदवनमध्वादिघटनम्
पुरद्वारं वृद्ध्या तपविकललोकाश्रमयुतम् ।
तथा वारुत्खानाभिघमथ भजाग्देवलमिति
प्रसिद्धं गोर्खायामपि नृपगृहं भीमरचितम् ॥ १६ ॥

यो दक्षं लक्ष्यवेधे रुचिरहरिकथाकर्णनैकाग्रचित्ताम्
तुङ्गं रिङ्गत्तुरङ्गं व्यधितवशयितुं संप्रवीणं प्रभुं स्वम् ।
बाल्ये नद्यादिबाहुप्रतरणनिपुणं वर्ण्यनानागुणौघम्-
मन्त्रीद्धो भीमसेनः सुकृतचयवशाल्लब्ध आभाति यस्य ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्क्रोधश्रुतिमात्रतोऽप्यरिवधूवृन्दाश्रुधारावृह-
द्धारा वोपचिता निरोद्य नटति द्राङ्नीलकण्ठावली ।
यो मातेव पितेव बन्धुरिव सत्स्त्रोत्र प्रभौ दासव-
च्चास्ते तत्र निधाय भीमसचिवे राज्यं नृपः क्रीडति ॥ १८ ॥

कश्चिच्चोनपचक्रवर्तिरचितः सन्धिः समृद्धोऽनिशम्
यन्मन्त्रान्मनसापि नेच्छति भियाऽऽक्रान्तुं प्रवृद्धोप्यरिः ।
ताम्रास्योऽमरसिंह मन्त्रिवरतः सीम्नि स्थिताद्यात्पितुः
सोऽयं मन्त्रिशिरोमणिर्हितकरो यस्यास्ति सोऽयं नृपः ॥ १९ ॥

स्वाम्यर्थाय हि जीवनं भवति तद् भ्रातर्व्रज त्वं युधी-
त्याज्ञप्तो रणसंमुखे नयनविं थापा यदीयोऽनुजः ।
स्वप्राणान जहाद्रिपून् भुजबलादाक्रम्य काङ्डाह्वये
कोटे क्लिष्टपथे प्रवेशसमये मन्त्री सयस्यास्त्यसौ ॥ २० ॥

नेपालोऽयमुपद्रवावलिशतस्थानं प्रभुर्बालकः
संरक्ष्यो मम सर्वथा गृहसुखं त्यक्त्वेति भूपालये ।
स्थित्वान्तर्बहिरुद्रधीविलसितो दृष्टि प्रदायानिशम्
यो जागर्त्ति स भीमसेनसचिवो यस्यानुरक्तोऽस्त्यसौ ॥ २१ ॥

अनुजवखतवारो येन सम्यङ् नियुक्तः
प्रतिपदमवनीशं सावधानोऽवति स्वम् ।
यमऽमृतरणवीरौ भ्रातरौ भक्तिमन्ता-
वनुसरत उदारौ सोऽस्ति भीमो यदीयः ॥ २२ ॥

लोका जानीत यूयं प्रभुहितकृतये नाऽभवन्नास्ति भावी
नो मन्त्री भीमसेनादपर इह लसद्बुद्धिचातुर्ययुक्तः ॥

तस्माद्भीमो गरुत्मानयमुत हनुमान् सेवितो ऽनेन भूपः
कृतो (ष्णो) वा राघवोऽवातरदिति कथयत्यत्र वाणीविलासः ॥२३॥

श्रुत्वा यन्मन्त्रिकर्माद्भुतमतिचकितः (स्फूर्ज) यित्वा स्वमूर्ष्णा
कम्पेन द्रष्टुमत्र क्षितितलविवराच्छेष एत्य स्थितः किम् ॥
कायव्यूहेन भीमोत्कटकृतिमिषतो मन्य इत्थं हि नोचे—
द्भूकम्पोऽभूद्विदीर्णा धरणिरपि कथं मन्त्रिकृत्यं च शुभ्रम् ॥ २४ ॥

यत्सचिवं भीमसेनं संमन्त्र्य च वाग्वतीतटे घटनम् ।
सेतोरकृत सुकीर्त्यै श्रीललितत्रिपुरसुन्दरी देवी ॥ २५ ॥

यस्मिन् सुन्दरसेतुवर्यरचनं श्रीभीमसेनान्वयात्
ताराधीशरु (चा वि) भाति हितकृच्छ्रीलक्ष्मणो पेतता ॥
वैदेहीति वचो जनो धरणिभृद्रामा (नुमा) वात्सद ।
लङ्कायादरमेति तत्सुचरितं रामायणं मन्महे ॥ २६ ॥

पारावा (रनि) वासिजन्तु निवहानायासतो निम्नगा—
मेतां मातृकुले तथा पितृकुले भर्त्तुः कुले संस्थिताः ।
ये ये ते पितरोऽपि दुस्तरभवाम्भोधिं प्रमोदान्विता—
स्तीर्त्वोद्यान्विति वाञ्छयाऽकृत वरं सेतुं नृपेन्द्रप्रिया ॥ २७ ॥

पाराबारतटस्थलोकबसतिग्रामाभिरामोदया
वाग्वत्यां विहितेयमालिरुपलाबद्धप्रघट्टान्वित ॥
राज्ञ्याः श्रीललितादिमत्रिपुरसुन्दर्याः स्फुरत्यद्भुता
मुक्ति श्रीपुररत्नवृक्जियोद्यन्ती पताका किल ॥ २८ ॥

गीर्वाणोत्तरयुद्धविक्रमनृपायुर्वृद्धिदा लेखनी
दैवी निर्मलभीमसेनमनसो वृत्तिः स्फुटा मूर्तिषूक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्तिः कापि शलाकिका त्रिपुरसुन्दर्य्याः स्वनिश्रेयस—
श्रीपूर्द्वारवरुद्धयोररर्योरुद्घाटिकोद्घाटने ॥ २९ ॥
प्रालङ्घं शतयोजनो जलनिधिर्यो जानकीजानिना
जायायै तरणाय वानरवरानीकस्य बद्धः पुरा ।
चित्रं तत्र किमत्र यत्त्रिपुरसुन्दर्य्या स्वभर्त्रादिको-
द्धारायाऽक्रियताऽध्यपारभववार्निष्येष सेतुर्दृढः ॥ ३० ॥
शाके १७३२ द्वित्रिमुनीन्दुमानिनि नागाङ्काहिहुमासम्मिते
संवत् १८६८ मास्यधिसिद्धि पौश्न (ष्ण) वणिजे मार्गे गुरोर्वासरे ।
शुक्लैकादशकान्विते एणबहादूराधिपश्रेयसे ।
राज्ञीयं मकरोदये कृतवती सेतोः शिलान्यासनम् ॥ ३१ ॥
गोर्वाणोत्तरयुद्धविक्रममहाराजाधिराजाज्ञया
कर्मण्यत्र स भीमसेनसचिवो लक्ष्म्यादिनारायणम् ॥
डिठ्ठेति प्रथितं सुकर्मनिपुणं प्राज्ञं नृपाज्ञाकरम्
प्राचीनानुचरं न्ययुङ्क्त मतिमान् श्रद्धाभरेण द्रुतम् ॥ ३२ ॥
सुव्वेतिव्यपदेशभाग्द्विजवरः श्रीलोकाख्वयः
पाँडेः सेवनविज्जयद्रथ इति ख्यातः सुबेदारकः ।
वीरो शो दलवारसंज्ञकसुवेदारो वरो बुद्धिमान्
सुव्वा पोहुवराभिधोऽतिनिपुणस्तद्वन्नियुक्ता अमी ॥ ३३ ॥
एतान् पञ्च नियोज्य कर्मनिपुणान् प्राधान्यतः पावके-
ष्वग्नीन्दु १३५३ प्रमितैः करैः परिमितं सेतुं दृढं सुन्दरम् ।
कृत्वा सिद्धिमिमं प्रभुं नृपवरं तन्मातरं स्वामिनीम्
सन्तोष्यास्य स भीमसेनसचिवो व्यज्ञापयत्संस्कृतिम् ॥ ३४ ॥

अथ नरपतिमात्रा दैवतार्चां विधाय
बहुलवसुविसर्गैर्हव्यवाहं सुतर्प्य ।
द्विजसमुदयदीनानाथलोकान्प्रतोष्य
निजपतिपरधामप्राप्तये संस्कृतोयम् ॥ ३५ ॥
संवत् १८६८ नागर्तुनागावनिपरिकलिते चैत्रिके कृष्णपक्षे
सप्तम्यां कुम्भगेर्के सुरगुरुदिवसे मैत्रभे हर्षणाख्ये ।
योगान्त्ये द्वन्द्वलग्ने ववकरणयुते हैमसिंहध्वजोद्य—
त्कीर्तिस्तम्भाभिरामो नृपतिमहिलया सेतुरुत्सृष्ट एषः ॥ ३६ ॥
गीर्वाणोत्तरयुद्धविक्रममहाराजाधिराजाज्ञया
जाता श्रीललितोत्तदत्रिपुरसुन्दर्य्याः परात्मेशितुः ।
प्रीत्यै कीर्तिरयं परा विजयतां वणेविलासस्तुता
कल्पान्तावधि भीमसेनसचिवप्रोद्यत्प्रभावान्विता ॥ ३७ ॥
अतः परं संस्कृतवाणीमजानानपि झटित्यर्थबोधाय
स एवार्थः संक्षिप्य भाषया प्रकटीक्रियते

श्री गोर्खा देशमा पहिले श्री द्रव्येशशाह महाराजा हुनुभयो उहाँपछि उनका पुत्र श्रीपूर्णशाह, उनका पुत्र संपूर्ण लोकमा स्थित बाँधन्या श्रीरामशाह, उनका पुत्र श्रीडम्बरशाह उनका पुत्र श्रीकृष्णशाह उनका पुत्र श्रीरुद्रशाह उनका पुत्र श्रीपृथ्वीपतिशाह, उनका पुत्र श्रीवीरभद्रशाह उनका पुत्र देवताको प्रसाद पाएका अनेक सिद्धिले युक्त भयाका श्रीनरभूपालशाह यिनैका पुत्र बाल्यावस्थैमा श्रीकाशी यात्रा गरी फिर्दामा छेकन आउन्या चौकीदार प्रभृति शत्रुसैन्यकन कत्तल गरि गोर्खा शहरमा प्रवेश गन्यो पछि बुवाकोट नेपाल प्रभृति देश मारि श्रीमहाराजे बहादुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शम्शेरजङ् पदवी पाउन्या श्रीपृथ्वीनारायणशाह महाराजा हुनु भयो, यिनैका पुत्र प्रजारञ्जन गर्दामा निपुण भएका श्रीसिंहप्रतापशाह महाराजा हुनु भयो. यिनैका पुत्र अति सुन्दर मूर्ति भएका सकल शत्रुको संहार गर्न्या दातामा अग्रगण्य देशका बडा-बडा राजा विषे पनि हुकुम चलाउन्या शस्त्र शास्त्र संगीत तंत्रादि सकल विद्याका निधान श्रीरणबहादुरशाह महाराजाधिराज पुत्रलाई राज्य दीकन स्वामी हुनु भयो. यिनैका अत्यन्त सौन्दर्यले युक्त भएका प्राणभन्दा पनि प्यारी श्रीकान्तिमती नाम भएका पत्नी स्वामिनी हुनु भयो. आफ्ना पुत्रकन पर्वत देशमा चक्रवर्ती महाराजा हुनु भएका सिंहासनमा चढ्याका यस्ता देख्न पाइकन संतोषले युक्त भई शास्त्रमा लेखेका जो दान छन्, तौ सबै दान गरीकन अन्तकाल विषे पनि आफ्ना स्वामीलेसँग भई वाणीविलास पण्डितका मुख देखिन् संम्पूर्ण श्री भागवत पुराणका अर्थ श्रवण गरी नारायणकन हृदय विषे राखी परम धाममा प्राप्त हुनु भयो. यिनै रणबहादुरशाह महाराजाधिराजका श्री ललितत्रिपुरसुन्दरी देवी, कान्छा महारानी हुनु भयो. बहुत सौन्दर्यले युक्त भएका कैलाशविषे विराजमान भएकी साक्षात् पार्वती जस्ता श्रीस्वामीज्यूले आफ्ना काखमा राखिदिएका पुत्र श्रीगीर्वाणयुद्ध विक्रमशाह महाराजाधिराजविषे प्राण राखिकन नारायणका चरणारविन्द विषे चित्त लगाई सर्वदा पुण्यकर्म गर्न्या भएका दीन अनाथ जसका गति केही पनि छैन. यस्ता जनविषे करुणा बहुतै गर्न्या. पतिव्रतामा अग्रगण्य भएका यस्ता सो कान्छा महारानी हुनुहुन्छ. श्रीरणबहादुरशाह महाराजाधिराज देखिन समुद्रदेखि उदाएका पूर्णचन्द्रले झैं सकल लोककन अत्यन्त आह्लादन गर्न्या. डेढ वर्षका उमेरमा आफ्ना पिता-

देखिन राज्याभिषेक पाएका कर्णभन्दा पनि बडा दाता कामदेवभन्दा पनि अति सुन्दर धर्मराज जस्ता अति सत्यवादी सदा धर्मकर्म गर्न्या। अर्जुन जस्ता बडा शूर सबुद्ध जस्ता अति गम्भीर पनि धीर पनि भएका सूर्य जस्ता बडा तेजस्वी भोजराजभन्दा पनि कविता सुन्दामा बडो प्रसाद दिन्या इत्यादि सकल राजगुणले युक्त भएका श्रीगीर्वाणयुद्ध विक्रमशाह महाराजाधिराज पैदा हुनु भयो. जसका जेठा महारानी श्रीसिद्धिलक्ष्मी देवी हुनुहुन्छ. यिनै महाराजा महारानीमा कलियुगका महिमाले घेरी भूमिमा जो जो भारका कारण छन्, तिनको विनाश गर्ना निमित्त कृष्णजीको अवतार महाराज रुक्मिणीजीको र सत्यभामाजीको अवतार यी दुइ महारानी हुन् भनि लोक यस्तो तर्कणा गर्दछन्. जस महाराजाका सकल मन्त्रिविषे शिरोमणि भएका भीमसेन थापा काजी छन् जो काजी दैववशले श्रीस्वामीज्यूको अकस्मात् परलोक हुनु एहि घोर विघ्न आउँदामा पनि घोर गम्भीर बुद्धिले सकल उपद्रवको निवारण गरी श्रीमहाराजाको रक्षा गर्न्या. श्रीमहाराजाको आयुस्य पुण्य प्रतापकीर्ति राज्य बढोस् भन्ना निमित्त बहुत दिनदेखि जीर्ण भएको भंडारखालकन अनेक तरहका चुनागिरिले जग् जग् भएका अनेक तरहका फलफुलका वृक्ष औषधि लतादिले पूर्ण भएको अति सुन्दर तुलाउनमा जग्गा-जग्गामा बाटाको संस्कार गरी सडक बनाउन शहरका ढोका-ढोका छेउका पाटी हिरु दर्बारको सुनको ढोकाहरु बनाइ सस्कार गर्न्या. बारूद खाना भजाक देवल विश्नुमतीको पूल वारीपारीका धर्मशाला घाट सुनको बारा गोर्खाको दरबार इत्यादि बनाउना आफ्ना प्रभुकन बाल्यैवस्थैमा भनु हाम्र. हरिकथा श्रवण गर्न घोडा चढ्न पौन्हन इत्यादि सकल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजनीतिमा कुशल तुल्याउन, जसका क्रोधमा सब थर्थरायमान काँप्दछन्. जो आफ्ना प्रभुदेखि महतारो झैं हित गर्दछन्. पिता झैं उपदेशको वार्ता विन्ती गर्दछन्. बन्धुवर्ग झैं स्नेह गर्दछन्. सत्स्त्री झैं सुख दिन्छन् सेवामा दास झैं जो रहन्छन्. जसका मन्त्रणामा चीनका पात्साहसितको थाहा पनि बन्दो जान्छ जसका मन्त्रणाले आफ्ना बाबा अमरसिंह थापा काजीलाई सिमानामा राजनाले बढ्याएको फिरङ्गी पनि आकन सक्दैन जसका भाइ नयनसिंह थापाले पनि काङ्डाकोटमा प्रभुका निमित्त लडाईंमा प्राण दियो जो काजी यो नेपाल उपद्रवको घर हो प्रभुभन्या बालक मैले संहार गऱ्यो हो भन्ना निमित्त गृहसुख छोडि पनि दरबारमा बसी भित्र बाहिर सर्वत्र नजर दिई, खबरदार भै रहन्छन्. जसले लगाएका भाइ वखतवारसिंह काजी श्रीमहाराजका हजूरमा बसी श्रीमहाराजका रक्षा रातदिन गर्दछन्. जसका रक्षा निमित्त बडा भ्रातृभक्त भएका अमृत काजी रणबीर काजी सर्वदा साथ रहन्छन् जसकाजीले सेवा गरिएका श्रीमहाराजाविषे कविजनहरू यस्तो वर्णन गर्दछन् श्रीमहाराजा कृष्णजीका अवतार हुन् भन्या यी काजी गरुडका अवतार हुन् श्रीमहाराजा रामजीका अवतार हुन् भन्या यी काजी हनुमानका अवतार हुन भनी इत्यादि प्रकारले वर्णन गर्दछन् यस्ता काजी प्रभुको सर्वप्रकारले हित गर्न्या जस महाराजाका प्रीतिपात्र छन् तिनै भीमसेन थापा काजीसित सल्लाहा गरी श्रीललतत्रिपुर सुन्दरी देवी नाम भएका श्रीस्वामी रणबहादुरशाहका कान्छा महारानीले कीर्ति र श्रीस्वामीज्यूको उद्धार हवस् भन्ना निमित्त यो बाग्मतीको पूल बनाउना कन इच्छा गरी हुकुम बक्सनु भयो वहाँदेखि

सकल राज्यको भार पाएका प्रभुका भएका बडा बुद्धिमान भीमसेन थापा काजीले एस काममा बहुत चित्त लगाई लक्ष्मीनारायण डिठ्ठा मुख्य गरी लोकनाथ पाण्डे सुब्बा जयद्रथ सुबेदार, ददवार सुबेदार फिंदु वरलामा सुब्बा प्रभृति अनेक मनुष्यकन लगाई शाके १७३२ संवत् १८६७ सालका मार्गशीर्ष महीनाका शुक्लपक्ष एकादशी तिथि रेवती नक्षत्र सिद्धियोग वणिक्करण बृहस्पतिवार मकर लग्नमा शिलान्यासपूर्वक एक वर्षमा तेह्रसय त्रिपन्न हातको यो पूल सुवर्णसिंहको ध्वज भएका कीर्तिस्तम्भले शोभायमान भएको बरिपरि धर्मशाला ग्रामहरू भएको सिद्ध गरी महाराजा महारानीकन संतुष्ट गराए बाह्रदेखि १८६८ सालका चैत्र कृष्ण सप्तमी बृहस्पतिवार अनुराधा नक्षत्र हर्षणयोग बवकरण मिथुन लग्नमा कुम्भको आदित्य हँदाभा यज्ञदान पुण्य गरी पुत्र श्रीगीर्वाणयुद्ध विक्रमशाह महाराजाधिराजलेसँग भई श्रीललितत्रिपुर सुन्दरी महारानीले श्रीजगदीश्वर प्रीतिपूर्वक श्रीस्वामीज्यूका उद्धार निमित्त बरिपरि धर्मशाला गुठी खेतलेसँग भएको यस पूलको उत्सर्ग गर्नु गयो। शुभंभूयादीश्वरप्रसादात्।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्युन्नतभवदातं नभ (:) स्पृशत्रिव मनोहरैशिखरैः ।
शशिभान्वोरभ्युदयेष्वमलमयूखायतन—

२१. भूतं ॥ ३८ ॥

वत्सरशतेषु पंचसु विंशत्यधिकेषु नवसु चाब्देषु ।
यातैष्वभिरम्य [तप] स्यमासशुक्लद्वितीयायां ॥ (३९)
स्पष्टैरशोकतरुकेतकसिदुवार-
लोलातिमुक्तकलतामदयंतिकानां ।
पुष्पोद्गमैरभिनवैरधिगम्य नून—
मैक्यं विजृंभितशरे हरपूतदेहे ॥ (४०)

२२. मधुपानमुदितमधुकरकुलोपगीतनगनैकपृथुशाखे ।
काले नवकुसुमोद्गमदंतुरकांतप्रचुररोद्ध्रे ॥ (४१)
शशिनेव नभो विमलं को [स्तु] भमणिनेव शार्ङ्गिणो वक्षः ।
भवनवरेण तथेदं पुरमखिलमलंकृतमुदारं ॥ ४२ ॥
अमलिनशशि

२३. लेखादंतुरं पिङ्गलानां
परिवहति समूहं यावदीशो जटानां ।
वि [कचक] मलमालामंससक्तां च शार्ङ्गीं
भवनमिदमुदारं शाश्वतन्तावदस्तु ॥ (४३)
श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः ।
पूर्व्वा चेयं प्रयत्नेन रचिता वत्सभट्टिना ॥ (४४)

२४. स्वस्ति कर्तृलेखकवाचकश्रोतृभ्यः ॥ सिद्धिरस्तु ॥

———

यशोधर्मन्‌को मन्दसोर स्तम्भाभिलेख

१. सिद्धम् [॥]

ॐ जयति जगतां पतिः पिनाकी
स्मित रवगीतिषु यस्य दन्तकान्तिः ।
द्युतिरिव तडितां निशि स्फुरन्ती
तिरयति च स्फुटयत्यवश्च विश्वम् ॥ (१)
स्वयम्भूभूतानां स्थितिलय [समु]

२. त्पत्तिविधिषु
प्रयुक्तो येनाज्ञां वहति भुवनानां विधृतये ।
पितृत्वं चानीतो जगति गरिमाणं गमयता
स शम्भुर्भूयान्सि प्रतिदिशतु भद्राणि भव [ताम्] ॥ २ ॥
फणमणिगुरूभार [ा वक्रा]

३. न्ति दुरावनम्रं
स्थगयति रुचमिन्दोर्म्मण्डलं यस्य मूर्द्ध्नाम् [।]
स शिरसि विनिबध्नन्नङ्घ्रिनीमश्चिमालां
सृजतु भवसृजो नः क्लेशभङ्गं भुजङ्गः ॥ (३)
षष्ट्या सहस्रैः सगरात्मजानां
ज्ञातः

४. खतुल्यां रुचमादधानः ।

५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्योदपानाधिपतेश्चिराय

यशान्सि पायात्पयसां विधाता ॥ (४)

अथ जयति जवेन्द्रः श्रीयशोधर्म्मनामा

प्रमदवनमिवान्तः शत्रुसैन्यं विगाह्य [।]

व्रण

५. किसलयमङ्गैर्य्योङ्गभूषां विधन्ते

तरुणतरुलतावद्वीरकीर्त्तीर्जिनाम्य ॥ (५)

आजौ जितो विजयते जगतीम्पुनश्च

प्रख्यात मौलिकरलाञ्छन आत्म—

६. वङ्शो (वंशो)

येनोदितोदितपदं गमितो गरीयः ॥ (६)

प्राचोनृपान्सुबृहतश्च बहूनुदीचः

साम्ना युधा च वशगान्प्रविधाय येन [।]

नामापरं जगति कान्तमदो दुरापं

राधाधिराज परमेश्वर

७. इत्युद्गढम् ॥ (७)

स्निग्धश्यामाम्बुदाभैः स्थगितदिनकृतो यज्वनामाज्यधूम्रै

रम्भोमेध्यं मघोनावधिषु विदधता गाढसम्पन्नसस्याः ।

संहर्षाद्वाणिनीनां कररभसहृतो—

८ द्यानचूताङ्कुराग्रा

राजन्वन्तो रमन्ते भुज विजितभुवा भूरयो येन देशाः ॥ (८)

20835

यस्योत्केतुभिरुन्मदद्विपकर व्याविद्धलोध्रद्रुमै—

रूढूतेन घनाध्वनि ध्वनिमदद्विन्ध्याद्रिरन्ध्रैर्ब्बलैः [।]

बाले

९. यच्छ्रवि धूसरेण रजसा मन्दाङ्शुसंलक्ष्यते

पर्यावृत्त शिखण्डि चन्द्रक इव ध्यामं रवेर्मण्डलम् ॥ (९)

क्षत्र्य प्रभोर्व्वङ्शकृतां नृपाणां

पादाश्रयाद्विश्रुतपुण्यकीर्त्तिः ।

भृत्यः स्वनैभृत्यजिता—

१०. रिषट्क

आसीद्वसीयान्किल षष्ठिदत्तः ॥ (१०)

हिमवत इव गाङ्गस्तुङ्गनम्रः प्रवाहः

शशभृत इव रेखा वारिराशिः प्रयोयान् [।]

परमभिगमनीयः शुद्धिमानन्ववायो

यत उदित गरि—

११. ष्णस्तायते नैगमानानाम् ॥ (११)

तस्यानुकूलः कुलजात्कलत्रा-

त्सुतः प्रसूतो यशसां प्रसूतिः ।

हरेरिवांङ्शं वशिनं वरादं

वराहदासं यमुदाहरन्ति ॥ (१२)

सुकृतिविषयितुर्ङ्ग स्वढमूलं

१२. वरायां

स्थितिमपगतभङ्गां स्थेयसीमादधानम् [।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुशिखरमिवाद्रेस्तत्कुलं स्वात्मभूत्या
रविरिव रविकीर्त्तिः सुप्रकाशं व्यधत्त ॥ (१३)
बिभ्रता शुभ्रमभुङ्क्ति स्मात्तं वर्त्मोचितं सताम् [।]

प्रताप मल्लः-

१३. दिता येन कलावपि कुलीनता ॥ (१४)
घुत धीदीधिति ध्वान्तान्हविर्भुज इवाध्वरान् [।]
मानुगुप्ता ततः साध्वी तनयास्त्रीनजीजनत् ॥ (१५)
भगवद्दोष इत्यासीत्प्रथमः कार्य्यवर्त्मसु ।
भाल-

१४. स्वनं बान्धवानामन्धकानामिवोद्धतः ॥ (१६)
बहुनयविधिवेधा गह्वरेष्वर्थ मार्गे
बिदुरइव विदूरं प्रेक्षया प्रेक्षमाणः ।
वचन रचनवन्धे संस्कृतप्राकृते यः
कविभिरुदि

१५. तरागं गीयते गीरभिज्ञः ॥ (१७)
प्रणिधि दृगनुगन्त्रा यस्य बौद्धेन चारुणा—
न निशि तवु दशीयो वास्त्यदृष्टं धरित्र्याम् [।]
पदमुदयि दधानोनन्तरं तस्य चाभू-
त्स भयमभयदत्तो नाम

१६. वि [घ्न] न्प्रजानाम् ॥ (१८)
बिन्ध्यस्यावन्ध्यकर्म्मा शिखरतट पतत्पाण्डुरेवाम्बुराशे—
र्गोलाङ्गूलैः सहेलप्लुतिनमितपरोः पारियात्रस्य चाद्रेः ।

आसिन्धोरन्तरालं निज शुचिसचिवाढ्या-

१७. सितार्वेक देशं
राजस्थानीय वृत्या सुरगुरुरिव यो वर्णिनां भूतयेपात् ॥ (१९)
विहितसकलवर्णसङ्करं शान्तडिम्बं
कृत इव कृतमेतद्येन राज्यं निराधि
स धुरमयमिदानीं

१८. दोषकुम्भस्य सूनु-
र्गुरुवहति तदूढां धर्म्मतो धर्म्मदोषः ॥ (२०)

स्वसुखमनभिवाञ्छन्दुर्गमेद् ध्वन्यसङ्गां
धुरमतिगुरुभारां यो दधद्भूरिवर्ये ।
वहति नृपतिवेषं केवलं लक्ष्ममात्रं

१९. वलिनमिव विलम्बं कम्बलं बाहुलेयः ॥ (२१)[१]
उपहितहितरक्षामण्डनो जातिरत्नै—
र्भुज इव पृथुलांसस्तस्य दक्षःकनीयान् [।]
महदिदमुदपानं खानयामास बिभ्र—

२०. च्छ्रुतिहृदय नितान्तानन्दिनिर्द्दोषनामा ॥ (२२)

---

१. तुलनीय—स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेवं विधैव ।
अनुभवति हि मूर्द्धना पादपस्तीव्रमुष्णम्
शमयति परितापं छायया संश्रितानाम् ।
(अभिज्ञानशाकुन्तल अंक ५ श्लोक–१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखाश्रेयच्छायं परिणतिहितस्वादुफलदं
गजेन्द्रेणारुग्णं द्रुममिव कृतान्तेन बलिना ।
पितृव्यं प्रोद्दिश्य श्रियमभयदत्तं पृ—

२१. थुधिया
प्रथीयस्तेवेदं कुशलमिह कर्म्मोपरचितं ॥ (२३)
पञ्चसु शतेषु शरदां यातेष्वेकाषष्टवधिक सहितेषु ।
मालवगणस्थितिवशात्कालज्ञानाय लिखितेषु ॥ (२४)
य-

२२. स्मिन्काले कलभदुगिरां कोकिलानां प्रलापा
भिन्दन्तीव स्मरशरनिभाः प्रोषितानांमनांसि ।
भृङ्गालीनां ध्वनिरवुवनं भारमन्द्रश्च यस्मि-
न्नाधूतज्यं धनुरिव नदच्छ्रूयते पुष्प-

२३. केतोः ॥ (२५)
प्रियतमकुपितानां कम्पयन्बद्धरागं
किसलयमिव मुग्धं मानसं मानिनीनां [।]
उपनयति नमस्वान्मानभङ्गाय यस्मि-
न्कुसुम समयमासे तत्र निर्म्मापितोयम् ॥ (२६)

२४. यावत्तुङ्गैरुदन्वान्किरणसमुदयं सङ्ग कान्तं तरङ्गै-
रालिङ्गन्निन्दुबिम्बं गुरुभिरिव भुजैः संविधत्ते सुहृत्ताम् [।]

बिभ्रत्सौधान्त लेखा वलयपरिगतिं मुण्डमालामिवायं
सत्कूपस्तावदा- मन्दाङ्शुप[illegible]
२५. स्तामृतरसस ॥ (६)
स्वच्छ निष्यन्दिताम्बुः ॥ (२७)
धीमान् वक्षो दक्षिणः सत्यसन्धो
ह्रीमांच्छूरो वृद्धसेवीकृतज्ञः ।
बद्धोत्साहः स्वामिकार्य्येष्वखेदो
निर्दोषोयं पातु धर्म्मं चिराय ॥ (२८)
उत्कीर्णा गोविन्देन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu